# Shri Bhaktisamvardhana Shatakam

# શ્રીભક્તિસંવર્ધનશતકમ્

## Document Information

Text title : Shri Bhaktisamvardhana Shatakam 06 37

File name : bhaktisaMvardhanashatakam.itx

Category : misc, shataka, advice

Location : doc_z_misc_general

Proofread by : Saritha Sangameswaran

Description/comments : From stotrArNavaH 06-37. pUrvabhAga and uttarabhAga 50 verses each

Latest update : January 6, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# શ્રીભક્તિસંવર્ધનશતકમ્

## પૂર્વભાગઃ

જાતં જાતં ખલુ જગદહો ચિત્રમેતત્ સમસ્તં
ક્ષીણં ક્ષીણં મુહુરપિ પરાદૃશ્યતે યત્પ્રભાવાત્ । (મૃશ્યતે)
તસ્મૈ સાક્ષાત્ સ્વરસપરમાનન્દવીચીમયાય
બ્રહ્માખ્યાય ત્રિભુવનપતે દેવ તુભ્યં નમોઽસ્તુ ॥ ૧॥ (બ્રહ્મણ્યાય)

જીવાત્મા યદ્ભ્રમતિ બહુશોઽપ્યત્ર સંસારચક્રે
તત્ત્વન્માયાવિલસિતમતઃ પ્રાઞ્જલિઃ પ્રાર્થયેઽહમ્ ।
મામાનાહં જગતિ ભગવન્ જન્મ સમ્પદ્યતે ચેત્ (માયાધીનં જગતિ)
કર્માભ્યર્હં ભવતુ ભવનાધીશ માનુષ્યમેવ ॥ ૨॥

ચાતુર્વર્ણ્યપ્રભૃતિવિભિદામુદ્રિતે માનુષં ચેત્ ।
બ્રહ્મણ્યાય સ્પૃહયતિ જગન્નાથ નિત્યં જનોઽયમ્ ।
તત્રાકુર્વન્નમૃતમશુભં કર્મ કુર્વન્નકામં
ભક્તો ભૂયાદ્ભવતુ ભગવન્ માર્ગયન્ મુક્તિમાર્ગમ્ ॥ ૩॥

બન્ધઃ કર્મણ્યથ બહુવિધે સ્ત્રીગુહાયાં પ્રવિષ્ટઃ
પુંસો રેતઃકણશબલિતે શોણિતે વર્તમાનઃ ।
વિટ્પઙ્કોત્થૈઃ કૃમિભિરભિતઃ તાડિતઃ પીડિતાત્મા
યાવત્ સીદામ્યવશમરવિન્દાક્ષ તાવત્ પ્રસીદ ॥ ૪॥

ક્ષારૈરુષ્ણૈરપિ ચ કટુભિર્માતુરાહારજાતૈઃ
ઉદ્બદ્ધાધો જઠરકુહરે સઙ્કુચત્સઙ્કુલાઙ્ગઃ ।
શ્વાસોચ્છ્વાસેષ્વહમતિતરાં ક્લેશશાલી યદા સ્યાં
ગોવિન્દ ત્વં પ્રશમય તદા ભક્તિભાજો મમાર્તિમ્ ॥ ૫॥

પ્રાચીનાનામનુશયવતો જન્મનાં કર્મણાં ચ-
સ્મારં સ્મારં મનસિ સહસા લબ્ધબોધોદયસ્ય ।

ગર્ભાગારે રુધિરકૃમિવિણ્મૂત્રપૂર્ણે સ્થિતસ્ય
    પ્રાદુર્ભૂયાન્મધુવિમથન ત્વત્સ્વરૂપસ્મૃતિર્મે ॥ ૬॥

મધ્યેગર્ભાશયમત ઇતો ભ્રાન્તિમાન્ વર્તમાનો
    માસિ પ્રાપ્તે તદનુ દશમે પૂર્યમાણાખિલાઙ્ગઃ ।
વ્યાસેધેન વ્યથિતહૃદયો રક્તજમ્બાલસિક્તો
    વૈકુણ્ઠ ત્વાં જનનસમયપ્રાપ્તખેદઃ સ્મરાણિ ॥ ૭॥

ભૂયો ભૂયઃ પ્રસૃમરકઠોરામનસ્યાર્દિતાયા-
    માક્રન્દ્રન્ત્યાં પ્રસવસમયે સ્રસ્તગાત્ર્યાં જનન્યામ્ ।
યન્ત્રચ્છિદ્રાત્ સપદિ વિવૃતાદ્દુઃખતઃ સૂતિવાતૈ-
    ર્નીતિં જાતં ભુવિ નિપતિતં પાહિ મામાર્તબન્ધો ॥ ૮॥

અદ્ભિઃ પ્રક્ષાલિતવપુરપિ સ્વચ્છતાં નોપગચ્છન્-
    માતુઃ સ્તન્યં ગલિતમુપજાતાર્તિરાસ્વાદ્ય સદ્યઃ ।
અસ્વાતન્ત્ર્યાદધિકવિમનાશ્ચેષ્ટિતેષ્વપ્રવીણઃ
    પ્રાપ્તો મોહં મુહુરહમહો રક્ષણીયોઽસ્મિ વિષ્ણો ॥ ૯॥

શીતોષ્ણાભ્યાં પ્રબલમરુતા ક્ષુત્તૃડાર્તિપ્રસક્ત્યા-
    યૂકાદંશપ્રભૃતિભિરપિ પ્રત્યહં બાધ્યમાનઃ ।
આત્મોત્સૃષ્ટૈરવિષહશકૃન્મૂત્રપઙ્કૈશ્ચ લિપ્તઃ
    સાક્રન્દોઽહં તવ મુરરિપો બાલકઃ પાલનીયઃ ॥ ૧૦॥

દન્તોત્પત્તેઃ પ્રથમમમૃદુ પ્રાયમાહારજાતં
    ભોક્તું વાચ્છન્નનિપુણતયા દૂયમાનો નિકામમ્ ।
યાવત્ ક્રન્દામ્યહમતિતરાં દીનદીનઃ ક્ષુધાર્તઃ
    તાવદ્દેવ પ્રસરતુ મયિ ક્ષિપ્રમેકઃ કટાક્ષઃ ॥ ૧૧॥

ઉત્તિષ્ઠાસુઃ કથમપિ સમુત્થાપિતો બાલવર્ગૈઃ
    મન્દં મન્દં કિમપિ ચરણન્યાસમાકાઙ્ક્ષમાણઃ ।
નાલમ્ભૂષ્ણુર્ઝટિતિ પતિતં નિષ્ઠુરે ભૂમિપૃષ્ઠે
    યાવન્મુહ્યામ્યજિત ભવતા રક્ષણીયોઽસ્મિ તાવત્ ॥ ૧૨॥

ક્રીડાલૌલ્યાદ્ગુરુભિરસકૃત્ પ્રેરિતઃ ક્રૂરવાગ્ભિઃ ।
    વિદ્યાભ્યાસે પ્રચકિતમના હન્ત શોચામિ યાવત્ ।
યાવદ્દૂયે દશનપતનૈઃ કર્ણવેધેન ચાહં
    તાવત્ પીતામ્બર તવ કૃપાલોક એવાવલમ્બઃ ॥ ૧૩॥

સસ્નેહાભ્યાં પરવશતયા પુષ્યમાણઃ પિતૃભ્યાં
    ક્રીડાલૌલ્યપ્રથિતબહુચાપલ્યમુલ્લઙ્ઘ્ય બાલ્યમ્ ।
દ્વૈતીયીકં પુનરથ વયઃ પ્રાપ્નુવન્ દૃપ્તચિત્તો
    લક્ષ્મીજાને તવ પદયુગં વિસ્મરન્ માસ્મ ભૂવમ્ ॥ ૧૪॥

ધર્માચારં દિનમનુપરિત્યજ્ય વિધ્વસ્તલજ્જઃ
    પાપાન્યાપાદયિતુમુદિતૌદ્ધત્યમુદ્યોગશાલી ।
અર્થાપત્યપ્રિયસુતકલત્રાદિસક્તાશયોઽહં
    ગર્હાભ્યર્તઃ સદસિ વિદુષાં મા ભવેયં મુરારે ॥ ૧૫॥

આશાપાશૈર્નિગલિતમહન્તાગ્રહગ્રાહકૃત્ત
    સ્વસ્થાવસ્થાપરિચયમનુષ્ઠાનનિષ્ઠાવિહીનમ્ ।
દૃપ્તં ચિત્તં મમ કુરુ તમોધામ કામભિતપ્તં
    મા મા મગ્નં નરકમથન સ્ત્રીવિષાબ્ધૌ દયાબ્ધે ॥ ૧૬॥

ત્યક્ત્વા ધૈર્યં વ્યપગતપરીપાકમુચ્ચૈર્વિપાકં
    મુક્ત્વા હિત્વા સપદિ ચ કૃપાં વાક્પટુત્વં ચ કૃત્વા ।
ક્રોધોદ્વૃત્તં ભવતિ યદિ મે ધ્વસ્તતત્ત્વપ્રબોધં
    ચિત્તં ચક્રાયુધ તવ પદસ્થાસ્નુ કર્તવ્યમેવ ॥ ૧૭॥

દેહે માંસક્ષત જભરિતે રૂપવત્તાભિમાનાત્
    કઞ્ચિત્ કાલં વપુષિ મિલિતો યૌવનસ્યોદયાચ્ચ ।
ઐશ્વર્યાદપ્યહહ સહસા નશ્વરરાદ્વિશ્વમૂર્તે
    ચિત્તં મત્તં પ્રચલતિ યદિ ત્વામૃતે કા ગતિર્મે ॥ ૧૮॥

વિદ્યાવત્ત્વં દ્રવિણગુરુતા પુત્રમિત્રાદિસૌખ્યં
    કસ્યાપિ સ્યાદ્યદિ સવયસઃ પ્રાયશો જાયમાનઃ ।
અન્તઃ સન્તાપકૃદવિરતં મત્સરો દુઃસહાત્મા
    મા મા નાથ પ્રસભમભવં પ્રશ્ન યસ્યાપનેતા ॥ ૧૯॥

યસ્મિન્ કસ્મિન્નપિ લઘુતરે કાર્યવસ્તુન્યવસ્થાં
    કાલં દેશં પુનરગણયન્ દ્રવ્યજાતં ત્યજામિ ।
યસ્માત્ક્ષોભાત્ સમુચિતમપાસ્યામિ ધર્મં ચ તસ્માત્
    ચેતો ડમ્ભાદ્વિરમતુ મમેત્યદ્ય યાચે હરે ત્વામ્ ॥ ૨૦॥

કઞ્ચિદ્ દૃષ્ટ્વા સપદિ વિપદે ભર્ત્સયે તત્સમક્ષં

વેગાદ્ધાવામિ ચ પથિ જલે નિષ્પતામ્યુત્પતામિ ।
કિઞ્ચાહેતોર્મુહુરપિ હસામ્યુચ્ચકૈર્યત્પ્રભાવાત્
દર્પઃ સોઽયં ન ભવતુ મમ ત્વત્પ્રસાદાન્મુકુન્દ ॥ ૨૧॥

માતુર્વાક્યં પિતુરપિ નિરાકૃત્ય નિત્યં ગુરૂણા-
માજ્ઞામુલ્લઙ્ઘય ચ ગુરુતરાન્નાતિબિભ્યન્મહદ્ભયઃ ।
અભ્યસ્યન્નપ્યવિનયમહો સ્ત્રૈણ એવ પ્રવૃત્તો
નામ ત્વામપ્યપરિગણયન્ મા દિનાન્યેષ નૈષમ્ ॥ ૨૨॥

બદ્ધોત્સાહઃ પ્રતિમુહુરસત્કર્મણે ધર્મદારાન્
દૂરાત્ત્યક્ત્વા રહસિ પરદારૈઃ સમં રન્તુકામઃ ।
નિન્દ્યાકારોઽપ્યતિજડમતિઃ સુન્દરમ્મન્ય એવ
સ્વેચ્છાકારી મદનવિવશો મા ભવં દેવદેવ ॥ ૨૩॥

વામાં વામાં કુટિલહૃદયાં કામમાત્મન્યકામા-
માગૃહ્ણાનઃ પ્રણયચપલઃ કામતપ્તાન્તરાત્મા ।
તત્તાદૃગ્ભિઃ કપટચરિતૈર્વઞ્ચ્યમાનસ્તયાહં
યોષિત્ક્રીડાકપિરિતિ વિભો માપહાસ્યેય સદ્ભિઃ ॥ ૨૪॥

સ્ત્રીભ્યો દત્ત્વા સકલમચિરાત્ સ્વાપતેયં સ્વકીયં
દારિદ્ર્યૈકઃ સ્વયમનુદિનં જાડ્યવાન્ પીડ્યમાનઃ ।
અન્યાયેન દ્રુતમથ પરદ્રવ્યમપ્યાજિહીર્ષુ-
ર્મૈવ શ્રીવલ્લભ દુરિતમિત્યાર્જિતં પ્રાજ્યકીર્તે ॥ ૨૫॥

મોહેનોપપ્લુતમતિરતિક્રમ્ય તારુણ્યમુદ્રાં
પાપં કુર્વન્ વિષમવિષયાકૃષ્ટચિત્તઃ પ્રમત્તઃ ।
આધિવ્યાધિપ્રભૃતિભિરપિ પ્રત્યહં બાધ્યમાનઃ
કર્ણાભ્યાર્ણાકલિતવલિતઃ ત્વાં વિભો ભાવયાનિ ॥ ૨૬॥

ક્ષુત્પ્રક્ષીણં નિજમવાધીર્બિભ્રદેકઃ કુસુમ્બં
નૈષ્ણિઞ્ચન્યાત્તમનભિલષન્ મિત્રવર્ગાદવિન્દન્ । (નૈષ્કિઞ્ચન્યાત્)
કર્માધીને વપુષિ જરસા જર્જરે લજ્જમાનઃ
સત્સંર્ગે ભવતિ ભગવન્ ભક્તચિત્તો ભવાનિ ॥ ૨૭॥

અસ્વાતન્ત્ર્યાત્ પરમનિપુણઃ ક્લેશલેશાસહિષ્ણુઃ
પુત્રૈર્દારૈઃ સતતરુદિતૈઃ સેર્ષ્યમાભાષ્યમાણઃ ।
શય્યાપર્યાકુલમધિશયારોહમુદ્વૃત્તલક્ષ્મા

યાવદ્બ્રૂયે મુરમથન તે નામ તાવત્ સ્મરાણિ ॥ ૨૮॥

કાસશ્વાસપ્રસરવિધુરેઽજીર્ણતાપૂર્ણગાત્રે
નેત્રશ્રોત્રપ્રભૃતિકરણગ્રામશક્ત્યા વિયુક્તે ।
અસ્પષ્ટાભિર્વદતિ વિકૃતં વાગ્ભિરુદ્ભૂતપશ્ચા-
ત્તાપે જાતે મયિ સકરુણં વીક્ષ્યતાં તાર્ક્ષ્યકેતો ॥ ૨૯॥

અન્યેનોત્થાપિતમકૃપયા શાયિતં જીર્ણતલ્પે
લલાજાલં વદનકુહરાદ્ભ્રષ્ટદન્તાદ્વમન્તમ્ ।
કષ્ટે દષ્ટં વપુષિ મશકૈર્મત્કુણૈર્મક્ષિકાભિ-
ર્મુહ્યન્તં મામજિત કૃપયા પાહિ પાહીતિ પાહિ ॥ ૩૦॥

ક્ષુત્ક્ષામત્વાદ્ભૃશતરમહો દુર્બલૈઃ પુત્રદારૈઃ
કષ્ટાવસ્થામહમુપગતોઽનાસ્થયા રક્ષ્યમાણઃ ।
શૂન્યાગારેઽપ્યપગતસુહૃદ્ભુમિમાવેષ્ટમાનો
દુઃખાયિષ્યે યદિ બત જરન્માધવ ત્વં પ્રસીદ ॥ ૩૧॥

દુષ્કર્માણિ પ્રબલતમસા જન્મનોપાર્જિતાનિ
સ્મારં સ્મારં નિરયપતનં શશ્વદુત્પ્રેક્ષમાણઃ ।
મૃત્યોર્બિભ્યન્નપિ જરઠતાં નિઃસહો મર્તુમિચ્છુઃ
ત્વન્નામોચ્ચારણમગણયન્નેવ માનાથભૂવમ્ ॥ ૩૨॥

શય્યાપ્રાન્તે સતતમવિદન્નેવ મોમૂત્ર્યમાણો
મુક્ત્વા ભુક્ત્વા બહુમલમનિર્વૃત્તશૌચઃ શયાનઃ ।
શ્વાસાયાસવ્યસનપરિપૂર્ણાર્તિરાસન્નમૃત્યુઃ
ત્રાતવ્યોઽહં તવ વિપવદસ્થાં ગતઃ શાર્ઙ્ગપાણે ॥ ૩૩॥

અત્યાસન્ના બહુમૃતિરમુષ્યેતિ શૃણ્વન્ જનાનાં
વાચં ઘો રૈર્ઘુરુઘુરુરવૈઃ ક્લિષ્ટકણ્ઠઃ કફેન ।
ક્ષુભ્યત્પ્રાણઃ શ્વસિતરભસોદ્ધૂતમર્માસ્થિબન્ધઃ
સોઽહં વિષ્ણો જય જય મુકુન્દેતિ વાણીં બ્રવાણિ ॥ ૩૪॥

જઞ્ઝાવાતે ચલતિ તિમિરે વર્ધમાને કઠોરે
મેઘેઽપ્યુચ્ચૈઃ સ્તનતિ સહસા કાન્દિશીકે જનૌઘે ।
દ્યાવાભૂમ્યોર્વિતતવપુષઃ પ્રેતરાજસ્ય દૂતાન્
પશ્યન્તં માં પરમકૃપણ રક્ષ પઙ્કેરુહાક્ષ ॥ ૩૫॥

વૃત્તાકારપ્રચલનયનો ધ્વાન્તરૌદ્રાનલાનિ
    વ્યાદીર્ણાનિ ભ્રુકુટિવિકટાન્યુગ્રદંષ્ટ્રોદ્ભટાનિ ।
દૃષ્ટ્વા દૃષ્ટ્વા યમભટમુખાન્યાશુ સન્ત્રસ્યતો મે
    નાથ ત્રાતા ભવ મૃતિદશાસઙ્કટે પઙ્કજાક્ષ ॥ ૩૬॥

ચક્રશ્વાસભ્રમિતવપુષં મૂત્રમપ્યુત્સૃજન્તં
    નેત્રોન્મેષં વિદધતમકાણ્ડે ચ ફેનાયમાનમ્ ।
આલોક્યાલોક્ય ચ યમભટાનન્તરા વેપમાનં
    પ્રાણાપાયવ્યસનસમયે રક્ષ માં ચક્રપાણે ॥ ૩૭॥

ક્ષુદ્રે સદ્યસ્તમકસહિતે બ્રહ્મવૃત્તાવસાને
    શ્વાસોચ્છિન્ને મહતિ ચ ચલત્યૂર્ધ્વમૂર્ધાભિધાને ।
દેહાદ્ દેહિ મમ વિઘટતે યાવદાસાદ્ય તાવત્
    સાક્ષાદ્ભૂયાસ્ત્વમિતિ ભગવન્ પ્રાર્થયે તીર્થપાદ ॥ ૩૮॥

મર્મસ્થાનાં પ્રકૃતિકઠિને લોઠતામસ્થિકૂટે
    સ્વસ્થાનેભ્યઃ કૃતદૃઢતરાઘાતમુદ્ઘાટિતાનામ્ ।
મત્પ્રાણાનાં વિદધતિ યદા યાતનાદેહયોગં
    મૃત્યોર્દૂતાઃ શિવ શિવ તદા પાહિ માં પદ્મનાભ ॥ ૩૯॥

હુઙ્કુર્વદ્ભિઃ શ્રવણપરુષં મુદ્ગરૈસ્તાડ્યમાનઃ
    પાશૈઃ પશ્ચાત્કૃતભુજયુગં ગાઢમાબદ્ધગાત્રઃ ।
તુષ્ટૈઃ કૃષ્ટઃ પિતૃપતિભટૈઃ કણ્ટકૈર્નીયમાનઃ
    ત્રાતવ્યોઽસ્મિ પ્રચુરકરુણાવાસ તે વાસુદેવ ॥ ૪૦॥

છાયાહીને વિષમિતપથે વીતતોયપ્રસઙ્ગે
    સન્તપ્તાભિર્ભૃશમત ઇતો વાલુકાભિશ્ચ પૂર્ણે ।
યાવન્નીયે વિગતકરુણૈઃ શ્રાદ્ધદેવસ્ય દૂતૈઃ
    તાવદ્ભક્તાભયદ ભગવન્નુત્તમશ્લોક પાહિ ॥ ૪૧॥

દુર્માર્ગાયા મરુમયભુવો યોજનાનાં સહસ્રં
    વેગાન્નીતઃ પ્રહરણવરૈઃ કિઙ્કરૈરઙ્કુશેન ।
આજ્ઞાં શ્રોતું તદનુ પુરતો દર્શિતો દણ્ડપાણેઃ
    સન્ત્રસ્તોઽહં મનસિ દયનીયોઽસ્મિ લક્ષ્મીપતે તે ॥ ૪૨॥

આહૂયાગ્રે સ્વયમથ યમો લેખકં ચિત્રગુપ્તં
    પાપાન્યાકર્ણ્ય ચ મમ તદા હન્ત તેનોદિતાનિ ।

યાવત્પાપી ચિરતરમયં દણ્ડ્યતામિત્યકાણ્ડે
    રોષાદાજ્ઞાપયતિ ચ જગન્નાથ રક્ષ્યોઽસ્મિ તાવત્ ॥ ૪૩॥

તામિસ્રાખ્યે મહતિ નરકે રૌરવેઽપ્યન્ધકૂપે
    પૂયસ્રોતસ્યસકૃદસિપત્રાટવીનામધેયે ।
લાલાભક્ષ્યેઽપ્યથ બહુવિધે કષ્ટમન્યત્ર યાવત્
    પાત્યે તાવત્ પરમપુરુષ ત્વં પ્રસીદ પ્રસીદ ॥ ૪૪॥

ઇષ્ટાપૂર્તિપ્રભૃતિસુકૃતાપાદનાત્ સ્વર્ગસૌખ્યં
    કઞ્ચિત્કાલં પુનરનુભવિષ્યામિ યદ્યપ્યુદારમ્ ।
ન શ્રદ્ધેયં ન ચ ખલુ તથાપ્યેતદસ્યાવસાને
    યજ્જન્મ સ્યાત્ પુનરિતિ વિભો મુક્તિકામોં ભવાનિ ॥ ૪૫॥

ગન્ધર્વા યે તુરગવદના યે ચ વિદ્યાધરા યે-
    સિદ્ધાઃ સાધ્યા અપિ બહુવિધા યે ચ યે વા રણાશ્ચ । (ચારણાશ્ચ)
યે કેઽપ્યન્યે દિશિ દિશિ નભોવર્ત્મના સઞ્ચરન્તે
    તેષાં સ્થાને ન હિ મમ રતિર્નાથ નિત્યેતરત્વાત્ ॥ ૪૬॥

ઇન્દ્રો વહ્નિઃ પિતૃપતિરથો યાતુધાનઃ પ્રધાન-
    સ્તોયાનાં ચ પ્રભુરથ મરુત્ કિન્નરેશો મહેશઃ ।
ઇત્યષ્ટૌ યે દિવમધિવસન્ત્યેકશો લોકપાલા-
    સ્તેભ્યો મે ન સ્પૃહયતિ હૃષીકેશ મોક્ષેચ્છુરાત્મા ॥ ૪૭॥

પૂર્ણૈઃ પુણ્યૈરથ ચ દુરિતૈર્ભૂરિભિઃ સૌખ્યદુઃખા-
    ન્યેકૈકસ્માદનુભવતિ યજ્જીવનામાયમાત્મા ।
તસ્માદિચ્છામ્યુપશમવિધાનેન નૈષ્કર્મ્યસિદ્ધિઃ
    યસ્માત્ સિધ્યેત્ પરમમમૃતં દેવ કૈવલ્યનાથ ॥ ૪૮॥

અષ્ટાઙ્ગસ્ય સ્વયમિહ સમારભ્ય યોગસ્ય યોગ્યા-
    સત્યસ્યાથ પ્રકટિતફલાન્યાશુ કર્માણ્યમૂનિ । (ન્યભ્યસ્યાથ)
મોક્ષપ્રાપ્ત્યૈ સ્પૃહયતિ મનો વિસ્મૃતાશેષસઙ્ગ-
    સ્ત્વત્પાદબ્જસ્મૃતિમનુભવામ્યેવ લક્ષ્મીનિવાસ ॥ ૪૯॥

ત્વત્કં ધ્યાયન્ મનસિ સકલં નિષ્કલં ચ સ્વરૂપં
    સર્વાત્મત્વં ત્વયિ ચ કલયન્ પૂર્ણભક્તિપ્રપઞ્ચઃ ।
નામાન્યુચ્ચાર્ય ચ બહુવિધાન્યસ્ય ચિન્તાવિહીનઃ-
    કૈવલ્યાર્થી તવ પરમહં દેવ દાસો ભવામિ ॥ ૫૦॥

॥ ઇતિ ભક્તિસંવર્ધનશતકે પૂર્વભાગઃ સમ્પૂર્ણઃ ॥

## ઉત્તરભાગઃ

જાતઃ સત્યવ્રતનુનૃપતેરઞ્જલૌ વર્ધમાનઃ (નરપતે)
    કલ્પામ્ભોધૌ વિતતસલિલે ક્લૃપ્તકેલીપ્રચારઃ ।
તસ્મૈ રાજ્ઞે હિતમુપદિશન્ વેદમપ્યાદદાનો
    માયામત્સ્યસ્ત્વમિહ મનસિ સ્મર્યસે વિશ્વનાથ ॥ ૫૧॥

પીયૂષાર્થં દિવિષદસુરૈરન્બુધૌ મધ્યમાને
    મન્થાદ્રૌ ચ ક્ષુભિતસલિલં યાતિ પાતાલમૂલમ્ ।
આદાયૈનં વિપુલિમભૃતા કર્પરેણોદ્ધરન્તં
    ચિત્તેન ત્વામજિતકુહનાકચ્છપં ચિન્તયામિ ॥ ૫૨॥

પારાવારે પ્રલયવિતતે ચઞ્ચદૂર્મિપ્રપઞ્ચે
    મગ્નાં પૃથ્વીમનિભૃતભૃતૌદ્ધત્યમુદ્ધર્તુકામઃ ।
મઙ્ક્ષુર્મગ્નઃ કુટિલશિખયા દંષ્ટ્રયા તાં દધાનઃ
    ક્રીડાક્રોડઃ કમલનયન ત્વં મયા ચિન્ત્યસેઽન્તઃ ॥ ૫૩॥

પ્રહ્લાદસ્ય સ્વપદયુગલીદત્તચિત્તસ્ય હત્યૈ
    સન્નદ્ધસ્ય ત્રિભુવનરિપોર્દૈત્યભર્તુર્નિહન્તા ।
ઘોરાકારઃ પ્રખરનખરો ભીષણભ્રૂકુટીક-
    સ્ત્રૈલોક્યાધીશ્વર મનસિ મે વર્તસે ત્વં નૃસિંહ ॥ ૫૪॥

વિશ્વાધીશે પ્રભવતિ બલૌ માણવીભૂય ભૂયઃ
    પૃથ્વીમગ્નીન્ધનવિધિકૃતયે યાચમાનો જિઘૃક્ષુઃ ।
આશુ ક્રામન્ ભુવનમખિલં ધાતૃનિર્ણિક્તપાદઃ
    ત્વં દેવેન્દ્રાવરજ મનસા વામનો ભાવિતોઽસિ ॥ ૫૫॥

જાતો મધ્યેધરણિ જમદગ્નેઃ સુતો રેણુકાયા-
    મન્તેવાસી ત્રિપુરમથિતુઃ કાર્તવીર્યસ્ય જેતા ।
પાણૌ બિભ્રત્પરશુમધિસઙ્ગ્રામમાસન્નવિંશાન્
    વારાન્ ક્ષેપ્તા દુરવનિભુજો દેવ રામ સ્મૃતોઽસિ ॥ ૫૬॥

જાતો વંશે સવિતુરૃષિણા સઙ્ગતો જાનકીશઃ

સ્વૈરં ગચ્છન્ વનમથ વિયુક્તપ્રિયો ધ્વસ્તવાલી ।
ઉત્તીર્ણાબ્ધિઃ કપિકુલબલો રાવણસ્યાપિ હન્તા
સીતાયુક્તઃ પુરમધિવસન્ દેવ રામ સ્મૃતોઽસિ ॥ ૫૭॥

શ્વેતાકારો હલમુસલવાન્ નીલવસ્ત્રન્દધાનઃ
કર્ષન્ મત્તસ્તપનતનયામાત્તપીતાઙ્ગરાગઃ ।
નાનાદૈત્યપ્રમથનપટુર્નાગરાજાવતારો
ભૂમેર્ભારં ગુરુમપહરન્ દેવ રામ સ્મૃતોઽસિ ॥ ૫૮॥

જાતો વંશે તુહિનમહસો ગોકુલે ક્લૃપ્તવાસઃ
કંસધ્વંસી પરિણયમથ સ્ત્રીગણાનાં વિતન્વન્ ।
ચૈદ્યારાતિઃ સમરસમયે સારથિઃ પાણ્ડુસૂનોઃ
ધાત્રીભારક્ષપણનિપુણો દેવ કૃષ્ણ સ્મૃતોઽસિ ॥ ૫૯॥

અન્તં સઙ્ગચ્છતિ કલિયુગે વર્ણસઙ્કીર્ણભાવે-
ભાવિન્યત્યુત્કટતરમધર્મે ચ વર્તિષ્યમાણે ।
અશ્વારૂઢઃ કરતલચલન્મણ્ડલાગ્રઃ ખલૌઘાન્
ભર્ત્સ્યર્ન્ કલ્કિત્રિભુવનપતે ઘોરરૂપઃ સ્મૃતોઽસિ ॥ ૬૦॥

શૈલે કૂટત્રયવતિ પયઃસિન્ધુના વેષ્ટયમાને
પુષ્પોદ્યાનોદરકમલિનીં ગાહમાને ગજેન્દ્રે ।
ગ્રાહગ્રસ્તે સ્તુવતિ તદનુગ્રાહકસ્ત્વં દયાલુ-
સ્તાક્ષ્યાર્રુઢઃ કમલનયન સ્મર્યસે ચક્રધારી ॥ ૬૧॥

દેવૈર્દૈત્યૈરપિ વિમથિતાદુત્થિતઃ ક્ષીરસિન્ધોઃ
શ્વેતોષ્ણીષી વલભિદુપલશ્યામલઃ ક્ષેમકારઃ ।
બિભ્રચ્ચક્રં દરમથ સુધાપૂર્ણકુમ્ભં જલૂકાં
દોર્ભિર્ધન્વન્તરિરિહ ભિષગ્ભાવ્યસે ત્વં મુરારે ॥ ૬૨॥

શ્રીકણ્ઠાય પ્રકટિતતરૌત્કણ્ઠ્યમાક્રીડમધ્યે
પ્રક્રીડન્તી ધુતતનુલતાસૌષ્ઠવાતિષ્ઠમાના ।
સભ્રૂભઙ્ગસ્મિતસહચરાપાઙ્ગલીલભિરામા
દૈત્યારે ત્વં કપટતરુણી ભાવ્યસે દિવ્યબેષા ॥ ૬૩॥

નૈષ્કર્મ્યાવિષ્કરણનિપુણઃ કર્દમાપત્યભૂતઃ
સ્વચ્છન્દાત્મા કપિલરુચિભિઃ શોભમાનો જટાભિઃ ।
તત્ત્વજ્ઞાનં પરમુપદિશન્ દેવહૂત્યૈ સ્વમાત્રે

ગોવિન્દ ત્વં મનસિ કપિલો વાસુદેવઃ સ્મૃતોઽસિ ॥ ૬૪॥

દુષ્ટાદ્વેનાન્મુનિજનમહાશાપતઃ પ્રાપ્તનાશાત્
જાતશ્ચાપાટનિવિદલિતક્ષ્માધરાયાં ધરાયામ્ ।
મેરૌ દોગ્ધર્યમિતધનધાન્યાદિ વિસ્તારયન્તં
ધ્યાયામિ ત્વાં પૃથુમતિપૃથુપ્રાભવં વિશ્વનાથ ॥ ૬૫॥

ભર્ગે ભક્તત્રિતયમપથે વર્તમાનં પુરાણાં
વાચોયુક્ત્યા પરિણતમહદ્ દ્વેષમાપાદાયન્તમ્ ।
ધર્મસ્થિત્યૈ પ્રથિતચરિતં બુદ્ધસંજ્ઞં મુનીન્દ્રં
માયાદેવીસુતમયિ હરે માયિનનં ભાવયે ત્વામ્ ॥ ૬૬॥

દાક્ષાયણ્યાં પ્રથિતયશસૌ ધર્મદેવસ્ય પુત્રૌ
સઞ્જાતૌ દ્વૌ મહિતનરનારાયણાખ્યં દધાનૌ ।
પ્રાલેયાદ્રેસ્તટભુવિ બદર્યાશ્રમે સંવસન્તૌ
રક્ષાહેતું જગતિ ભગવન્ ભાવયામિ ત્વદંશમ્ ॥ ૬૭॥

સૌન્દર્યશ્રીલલિતવપુષં ક્લૃપ્તસંન્યાસાવેષં
દિવ્યં દિગ્વાસસમત ઇતઃ સ્ત્રીસહાયં ચરન્તમ્ ।
અધ્યાત્મજ્ઞૈર્મુનિભિરભિતઃ સ્તૂયમાનં મુનીન્દ્રં
દત્તાત્રેયં મનસિ ભગવન્ ભાવયામિ ત્વદંશમ્ ॥ ૬૮॥

રેવાસ્રોતોવિહરણપરં પ્રસ્ફુરદ્દોઃસહસ્રં
ધાત્રીરક્ષાપરમપરિમેયાત્મવીર્યાનુભાવમ્ ।
દત્તાત્રેયાદુપગતવરં કાર્તવીર્યાર્જુનં ત્વાં
કીર્તિસ્તોમાજ્જનિતભુવનં ભાવયે શ્રીનિવાસમ્ ॥ ૬૯॥

પારાશર્યા પરિણતતનુર્બીજશક્ત્યા શ્રુતીનાં
વ્યાસં કુર્વન્ બહુવિધપુરાણેતિહાસપ્રણેતા ।
વેદાન્તાર્થપ્રકાશસ્તુતિમુપનયન્ પૂર્ણશિષ્યપ્રશિષ્યઃ
કૃષ્ણદ્વૈપાયનમુનિવરઃ સ્મર્યસે ત્વં મુકુન્દ (?) ॥ ૭૦॥

વેલાઘાતપ્રચલિતમહાવીચિજાલપ્રસર્પ-।
ત્ફેનાવર્તં ધવલસલિલોદ્ભ્રાન્તયાદઃકદમ્બમ્ ।
નાનારત્નદ્યુતિતરલિતાગાધગર્ભપ્રદેશં
દુગ્ધામ્ભોધિં મનસિ ભગવન્ ભાવયે ત્વન્નિવાસમ્ ॥ ૭૧॥

પુષ્યત્કલ્પદ્રુમસુરલતાજૃમ્ભિતામોદભારં
    નાનાપક્ષિપ્રવરલલિતાબન્ધનાદપ્રપઞ્ચમ્ ।
ભૃઙ્ગશ્રેણીરવમુખરિતં મન્દવાતાભિરામં
    શ્વેતદ્વીપં તવ પદમિમં દેવ સમ્ભાવયામિ ॥ ૭૨॥

ઉદ્યાનોદ્યત્કુસુમનિકરં ગોપુરાબદ્ધસાલં
    રથ્યાશૃઙ્ગાટકવિલસિતં કેતનોદ્યત્પતાકમ્ ।
પ્રાસાદાગ્રસ્ફુરિતવલભીભાગમુત્તુઙ્ગસૌધં
    વાસસ્થાનં મનસિ કલયે પદ્મનાભ ત્વદીયમ્ ॥ ૭૩॥

આશાપાલાન્ સહિતદયિતાન્ સપ્રિયાન્ દેવયોનીન્
    દેવબ્રહ્મક્ષિતિપતિમુનીન્ ભક્તિભારૈર્વિનમ્રાન્ ।
ત્વત્પાદાબ્જપ્રણમનપરાન્ ભક્તિભારાવનમ્રાન્
    પર્યન્તસ્થાન્ પરમપુરુષ ત્વન્મયાન્ભાવયામિ ॥ ૭૪॥

તત્ત્વજ્ઞાનપ્રવણહૃદયાન્ ભૂયશોઽભ્યસ્તયોગાન્
    જ્યોતિર્જાલપ્રસરતરલાન્નિત્યકૌમારયુક્તાન્ ।
બ્રહ્માણ્ડાન્તભ્રમણનિપુણાનુજ્જ્વલત્ત્વત્પદાબ્જ-
    પ્રાપ્તાન્ પદ્મારમણ સનકાદ્યાન્ મુનીન્ ભાવયામિ ॥ ૭૫॥

ભૂષાવેષાદ્યધિકસુભગાન્ દોશ્ચતુષ્કાભિરામાન્
    મેઘશ્યામાન્ કપિશવસનાન્ ફાલબદ્ધાર્ધપુણ્ડ્રાન્ ।
દીર્ઘાપાઙ્ગાન્ પ્રહસિતમુખાન્ ભક્તલોકૈકબન્ધો
    નાથ ત્વત્પાર્ષદવૃષવરાન્નન્દમુખ્યાન્ સ્મરામિ ॥ ૭૬॥

ભક્તિપ્રહ્વં મુકુલિતદૃશં પ્રાઞ્જલિં પ્રાન્તસંસ્થં
    નામાન્યુચ્ચૈઃસ્વરમુખરિતાભ્યાશમુચ્ચારયન્તમ્ ।
આહ્લાદાર્દ્રે મનસિ વિકસત્ત્વત્સ્વરૂપપ્રકાશં
    પ્રહ્લાદાખ્યં નલિનનયન ત્વત્પ્રિયં ચિન્તયામિ ॥ ૭૭॥

સઙ્ગાયન્તૌ ગમકગતિમન્મૂર્છનાગ્રામભિન્ન-
    શ્રુત્યારૂઢસ્વરપરિણમદ્રાગહૃદ્યં વિપઞ્ચ્યા ।
નાનાવન્દિપ્રવરસહિતૌ ગાયકૌ તાવકીનૌ
    સાક્ષાદીક્ષે મનસિ ભગવન્નારદં તુમ્બુરું ચ ॥ ૭૮॥

કિઞ્ચિદ્વિસ્રંસિતકચભરાઃ પૂર્ણસર્વાઙ્ગભઙ્ગી-
    નૈપથ્યશ્રીમધુરિમજુષો મઞ્જુશિઞ્જાનભૂષાઃ ।

પાર્શ્વે સ્થિત્વા લલિતલલિન્ત ચામરં ચારયન્તીઃ
    પશ્યામ્યન્તદિતિસુતરિપો ચામરગ્રાહિણીસ્તે ॥ ૭૯॥

અભ્યાશસ્થં ભુજગપટલીભૂષિતોદ્દીપ્તગાત્રં
    પક્ષક્ષેપક્ષુભિતભુવનં ચણ્ડતુણ્ડપ્રકાણ્ડમ્ ।
આપિઙ્ગાક્ષં કનકકપિશજ્યોતિષં વાહનં તે
    તાર્ક્ષ્યં વીક્ષે મનસિ કરબદ્ધાઞ્જલિં કઞ્જનાભ ॥ ૮૦॥

શૂત્કુર્વન્તં ફણદશશતીવિસ્ફુરદ્રત્નજાલં
    દંષ્ટ્રાકોટિદ્વિતયવિલસચ્ચણ્ડતુણ્ડાન્તરાલમ્ ।
શ્વેતાકારં તરલપવનાહારતો વર્ધમાનં
    પર્યઙ્કસ્થં મનસિ કમલાકાન્ત પશ્યામ્યનન્તમ્ ॥ ૮૧॥

જ્યોતિર્જાલજ્વલિતવપુષઃ પ્રાઞ્જલીન્ પ્રાજ્યવિદ્યાન્
    ઉચ્ચૈરભ્યુચ્ચરિતજયશબ્દસ્વનાધ્માપિતાશાન્ ।
મૂર્તાન્ દૈત્યપ્રમથનપરાનાયુધૌઘાન્ પ્રભાતે
    ચિત્તાભોગઃ પ્રકટયતિ મે શઙ્ખચક્રપ્રધાનાન્ ॥ ૮૨॥

પીતશ્યામપ્રભતનુલતે રક્તપીતાઙ્ગરાગ-
    ક્ષૌમાભોગે મકુટકટકાદ્યુજ્જ્વલન્ ભૂશિતાઢ્યે ।
સૌન્દર્યોદ્યત્તરુણિમદિલાસાઞ્ચિતે પાર્શ્વસંસ્થે
    સઙ્ગચ્છેતે હૃદિ મમ હરે ત્વત્પ્રિયે શ્રીધરણ્યૌ ॥ ૮૩॥

રત્નભ્રાજત્કનકમકુટં કુઞ્ચિતાનીલકેશં
    વેલ્લત્સાન્દ્રાલકમલિકસમ્ભાસમાનોર્ધ્વપુણ્ડ્રમ્ ।
ભ્રૂવિક્ષેપાઞ્ચિતમભિનવામ્ભોજપત્રાયતાક્ષં
    સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્સ્વરૂપમ્ ॥ ૮૪॥

કર્ણાભ્યુદ્યન્મકરવિલસત્કુણ્ડલં તુઙ્ગનાસં
    દન્તજ્યોત્સ્નામધુરમધરજ્યોતિષા શોભમાનમ્ ।
ગણ્ડાભોગોડ્ડમરસુષમં કૌસ્તુભોલ્લાસિકણ્ઠં
    સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્સ્વરૂપમ્ ॥ ૮૫॥

હારાભ્યન્તસ્સ્ફુરિતતુલસીદામવન્યસ્રગાઢ્યં
    શ્રીવત્સાઙ્કપ્રથિનઘુસૃણામોદિવક્ષોવિભાગમ્ ।
દીપ્તસ્વર્ણાઙ્ગદવલયકેયૂરવદ્દોશ્ચતુષ્કં
    સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્સ્વરૂપમ્ ॥ ૮૬॥

ઉદ્યદ્રોમાવલિવલિયુતં પ્રસ્ફુરદ્દુન્દબન્ધં
લોકેશાઢ્યાસિતવિકચપદ્મોલ્લસન્નાભિરન્ધ્રમ ।
કાઞ્ચીદામાઞ્ચિતકટિતટં પીતકૌશેયવસ્ત્રં
સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્સ્વરૂપમ્ ॥ ૮॥

આપીનોરુદ્વિતયમતુલાકારજાનુપ્રદેશં
ભ્રાજજ્જઙ્ઘાયુગલસુષમાભોગમાગૂઢગુલ્ફમ્ ।
કૂર્માકારપ્રપદમધિકાતામ્રપાદારવિન્દં
સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્વરૂપમ્ ॥ ૮૮॥

કાલામ્ભોદાજ્જનનવકલાયપ્રસૂનાભિરામં
શ્યામજ્યોતિષ્પટલપરિવેષાઞ્ચિતં ચારુવેષમ ।
સર્વાઙ્ગીણપ્રકટનફલાવન્યપૂર્ણપ્રકાશં (ફલાવન્ધ્ય)
સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્સ્વરૂપમ્ ॥ ૮૯॥

ઉદ્યન્મન્દસ્મિતમધુરિમોદ્ભાસિવક્ત્રારવિન્દં
કારુણ્યામ્ભઃપ્રસરલહરીપૂર્ણનેત્રારવિન્દમ્ ।
યોગીન્દ્રાન્તઃકરણમધુલિટ્સેવ્યપાદારવિન્દં
સાક્ષાદીક્ષે મનસિ મધુવિધ્વંસન ત્વત્સ્વરૂપમ્ ॥ ૯૦॥

પાતાલાઙ્ઘ્રિં ધરણિવલયં શ્રોણિભાગં વિહાય
મધ્યોદ્દેશં સુરપુરમુખં બ્રહ્મલોકોત્તમાઙ્ગમ્ ।
ભાસ્વચ્ચન્દ્રેક્ષણમનિલનિશ્વાસમમ્ભોધિવીર્યં
ધ્યાયામ્યન્તસ્ત્રિભુવનપતે પૂરુષં ત્વાં વિરાજમ્ ॥ ૯૧॥

ભૂતાત્માનં ભુવનવિતતં ભૂતિસર્વસ્વભાઞ્જ
ભુક્તેર્મુક્તેરપિ ચ વિષયં ભૂરિકારુણ્યપૂર્ણમ્ ।
ભૂતગ્રામપ્રભવવિભવં ભૂર્ભુવઃસ્વર્નિધાનમ્ ।
ભૂયો ભૂયો મનસિ ભગવન્ ભાવયેયં ભવન્તમ્ ॥ ૯૨॥

માયાતીતં મનનવિષયં મૌનભાજાં મુનીનાં
કાલાત્માનં કલિમલમુષં કારણં કારણાનામ્ ।
દુર્વિજ્ઞેયં નિગમવચસા મુખ્યાવાક્યાર્થસારં
તેજોરૂપં ત્રિભુવનપતે ચેતસા ત્વાં સ્મરામિ ॥ ૯૩॥

આત્મારામં વિપુલમમલં વાક્પ્રપઞ્ચાતિવૃત્તં

દ્વન્દ્વાતીતૈર્વિષયવિમુખૈર્યોગિભિશ્ચિન્ત્યમાનમ્ ।
આવિર્ભૂતસ્વરસપરમાનન્દનિષ્યન્દસાન્દ્રં
વિશ્વોત્પત્તિસ્થિતિલયકરં ત્વાં મુરારે સ્મરામિ ॥ ૯૪॥

મુક્તિસ્થાનં મુનિજનમનોમન્દિરં મૂર્તિહીનં
નાનાકારં નિરુપમમસઙ્ખ્યાતવીર્યાનુભાવમ્ ।
નિર્વ્યાપારં વિવિધવિભવં નિર્મલં નિર્વિકલ્પં
વિશ્વાકારં પરમપુરુષ ત્વામહં ભાવયામિ ॥ ૯૫॥

સ્થૂલં સૂક્ષ્મં ગુરુલઘુસમુત્તુઙ્ગમુચ્ચૈર્ગભીરં
દીપ્રં શાન્તં તરલમચલવ્યક્તમવ્યક્તરૂપમ્ ।
સર્વાધ્યક્ષં સકલકરુણાગોચરં લૂતમાયં
માયાહીનં મનસિ કલયે દેવ રૂપં ત્વદીયમ્ ॥ ૯૬॥

સત્તામાત્રં વિકૃતિરહિતં વ્યાપ્તમાદ્યન્તશૂન્યં
સંવિદ્રૂપં ગુણગણનિકાવિક્રમાહ્લાદપૂર્ણમ્ ।
શુદ્ધં બુદ્ધં વિઘટિતતમોબન્ધમાત્મપ્રકાશં
પ્રત્યગ્ભૂતં તવ મુરરિપો રૂપમન્તઃસ્સ્મરામિ ॥ ૯૭॥

સર્વસ્માદપ્યુપરિ વિલસત્સર્વભૂતાત્મભૂતં
સર્વાકારપ્રકટનપરં સર્વતેજોનિધાનમ્ ।
સર્વાપાયક્ષપણનિપુણં સર્વલોકપ્રધાનં
ત્વદ્રૂપં મે લસતુ હૃદયામ્ભોરુહે દેવદેવ ॥ ૯૮॥

નિર્વાણાખ્યં નિખિલજગતામાશ્રયં દુર્વિભાવ્યં
ભવ્યં દિવ્યં ભવજલનિધેઃ પારમુચ્ચૈરયન્તમ્ ।
સચ્ચિત્સૌખ્યાત્મકમુપનિષન્મુખ્યવાક્યપ્રપઞ્ચ-
વ્યાખ્યાયોગ્યં પરમપુરુષ ત્વત્સ્વરૂપં સ્મરામિ ॥ ૯૯॥

સત્યં જ્ઞાનં મુહુરપિ મહાયોગિભિશ્ચિન્ત્યમાનં
પૂર્ણાનન્દામૃતલહરિકાજાલમાન્યં તુરીયમ્ ।
ઓઙ્કારાર્થં પરમમમૃતં ત્વન્નિષેધાવશેષં
બ્રહ્માદ્વૈતં પરમપુરુષ સ્વાત્મબોધં સ્મરામિ ॥ ૧૦૦॥

સ્તોત્રં વિષ્ણોરિતિ મૃદુપદૈઃ સુપ્રબન્ધૈઃ શતેન
શ્લોકૈરેભિર્વિરચિતમિદં ભક્તિસંવર્ધનાખ્યમ્ ।
ભક્ત્યા યુક્તઃ પઠતિ ખલુ યઃ પ્રાતરુત્થાય નિત્યં

પ્રાણાપાયે વ્રજતિ હિ હરેર્ધામ નિર્વાણનામ ॥ ૧૦૧॥

ઇદં સ્તોત્રં પઠેન્નિત્યં યો નરઃ પ્રાતરુત્થિતઃ ।
ભક્તિસંવર્ધનં નામ સ યાતિ પરમં પદમ્ ॥ ૧૦૨॥

ભક્તિસંવર્ધનં નામ શ્લોકાનાં શતકં મયા ।
બ્રહ્મદત્તાભિધાનેન સ્તોત્રં વિષ્ણોર્વિનિર્મિતમ્ ॥ ૧૦૩॥

॥ ઇતિ શ્રીભક્તિસંવર્ધનશતકે ઉત્તરભાગઃ સમ્પૂર્ણઃ ॥

ઇતિ ભક્તિસંવર્ધનશતકં સમ્પૂર્ણમ્ ।

Proofread by Saritha Sangameswaran

*Shri Bhaktisamvardhana Shatakam*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*